National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2024;** 1(56): 190-191
© 2024 NJHSR
www.sanskritarticle.com

**जया मनराल नेगी**
शोधच्छात्रा,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-विश्वविद्यालय, नई दिल्ली

**Correspondence:**
**जया मनराल नेगी**
शोधच्छात्रा,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-विश्वविद्यालय, नई दिल्ली

# प्रस्थानत्रय्याः संक्षिप्तावलोकनम्

**जया मनराल नेगी**

## सारांश

प्रस्थानत्रयी यस्याः अर्थोऽस्ति त्रीणि प्रस्थानि त्रीण् स्रोतांसि वा इदन्नकेवलं वेदान्तदर्शनस्य विभिन्नशाखाभ्यः आधारभूतं शास्त्रीयकलेवरमस्ति अपितु भारतीयदार्शनिकपरम्परायामाध्यत्मिक-ज्ञानाधिकारस्याद्वितीयस्तम्भरूपे प्रतिष्ठिताऽस्ति। एतानि त्रीणि प्रस्थानानि गीतोपनिषद्ब्रह्मसूत्राणि वेदान्तस्य प्रतिप्रमुखविचारधारया परमप्रमाणानि मन्यन्ते एषाञ्च समन्वितावबोधेन विना वेदान्तिकचिन्तनस्य गहनतां व्यपकताञ्च आत्मसात्करणमसम्भवमस्ति।

उपनिषद्, श्रीमद्भगवद्गीता तथा ब्रह्मसूत्रम् इति शास्त्रत्रयाणां समुच्चयः प्रस्थानत्रयी नाम्ना अभिहिता वर्तते। भारतीय-अध्यात्म शास्त्रस्य मुकुटमणिः वेदान्तदर्शनं वर्तते। तस्मिन् प्रस्थानत्रयी विशिष्टत्वेन महीयते। वेदान्तदर्शनस्य आधारशिला तु श्रुतिः वर्तते। तच्च आध्यात्मिकविचारेभ्यः श्रुतयः एव प्रमाणानि सन्ति। तथा प्रस्थानत्रयिषु सम्मिलिताः ग्रन्थाः मुख्यरूपेण अध्यात्मतत्त्वस्य सारमेव प्रतिपादयन्ति। अतः वेदान्तदर्शने अपि श्रुतिवत् प्रस्थानत्रयीणां प्रमाणं कथयन्ति।

एते त्रयः प्रस्थानाः ब्रह्मविषयकविद्यायाः परमलक्ष्यप्राप्तेश्च वा हेतवे साधनानि प्रतिपादयन्ति। तेषु च उपनिषद् सर्वश्रेष्ठ प्रस्थानत्वेन मन्यते। द्वितीयस्थानं श्रीमद्भगवद्गीयाः वर्तते यस्याम् उपनिषदां सारतत्त्वं रोचकशैल्या वर्णितम्वर्तते। तृतीयं स्थानं च ब्रह्मसूत्रणां वर्तते यस्मिन् उपनिषदां पारस्परिक विरोधिमनतव्यानां परिहार्यः समन्वयो भवति। उपनिषद् भारतीय-अध्यात्मशास्त्रणां सर्वश्रेष्ठः उपजीव्यो ग्रन्थो वर्तते। अतः एव प्रस्थानत्रयीषु प्रथमं स्थानं वर्तते। वेदानाम् अन्तिमभागत्वात् उपनिषद् वेदान्तोऽपि कथ्यते।

## उपनिषद्

वेदेषु मुख्यतया विषयत्रयस्य प्रतिपादनं विहितम्-कर्मकाण्डः उपासनाकाण्डः ज्ञानकाण्डश्च। अस्य प्रतिपाद्यविषयद्वयं वर्तते- प्रथमा ब्रह्मविद्या द्वितीयं मानवानां परमं लक्ष्यम्, यस्यान्तर्गते ब्रह्मस्वरूपम्, ब्रह्मात्मनोः एकता ब्रह्मप्राप्तिसाधनस्य ज्ञानम्, ब्रह्मप्राप्तिः इत्यादयः विषयाः भवन्ति।

उपनिषदां साहित्यम् अत्यन्तं विशालं वर्तते। अस्य संख्यायाः विषये विदुषां प्रायः मतभेदो वर्तते। मुक्तिकोपनिषदि 108 उपनिषदां वर्णनं वर्तते।[1] येषु ईश-केन-कठ-प्रश्न-मुण्डक-माण्डूक्य, तैत्तरीय-ऐतरेय-छान्दोग्य-बृहदारण्यकोपनिषदः सर्वाधिक-प्राचीनाः प्रामाणिकाश्च सन्ति।[2]

## ब्रह्मसूत्रम्

प्राचीनकालादेव विभिन्नविचारकानां तत्त्वचिन्तकानां उपनिषत्सु भाष्याः सन्ति। प्रत्येकं विचारकः स्वकीयेन दृष्टिकोणेन गवेषणां करोति। यस्य फलस्वरूपेण द्वैतम्, अद्वैतम्, भेदाभेदः इत्यादयः मताः जायन्ते। ब्रह्मसूत्रं हि वेदान्तदर्शनस्य अत्यधिक महत्त्वपूर्णो ग्रन्थो वर्तते। तर्कप्रधानत्वात् न्यायप्रस्थानमपि कथ्यते। अस्य रचयिता बादरायणो मन्यते। ब्रह्मसूत्रस्यापरो नाम वेदान्तसूत्रम् वर्तते शारीरसूत्रम्, शारीरमीमांसा, उत्तरमीमांसा, भिक्षुसूत्रम् इत्यादि कथ्यते।

बादरायणकृते ब्रह्मसूत्रे समासात्मकतया तर्कप्रधानतया वा ब्रह्मविषयक सिद्धान्तानां वा प्रतिपादनं वर्तते। अस्मिन् चत्वारोऽध्यायः 16 पादाः सन्ति। समन्वयाध्याय इति प्रथमोऽध्यायः, यस्मिन् ब्रह्मणः स्वरूपं वर्णितम्। अविरोधात्मकः इति द्वितीयोऽध्यायः, यस्मिन् ब्रह्मणः स्वरूपे विरोधि सम्भावनानां

मन्तव्यानां वा परिहारो वर्तते। तथा भूतसर्गः, जीवात्मनो गति-अगति, इन्द्रियसर्गः इत्यादीनां विवेचनं वर्तते। साधनाध्याय इति तृतीयोऽध्यायः, यस्मिन् जीवात्मनः संसारीया गतिः, सुषुप्त्या-द्यावस्था इत्यादीनां वर्णनं तथा विभिन्नोपसनानां विस्तृतं विवेचनं कृतम्।फलाध्याय इति चतुर्थोऽध्यायः, यस्मिन् मुख्यसिद्धान्तः प्रतिपादिताः सन्ति यत् ब्रह्मज्ञानेनैव हि मोक्षप्राप्तिः सम्भवा वर्तते।

उपनिषद्वद् ब्रह्मसूत्राणामपि परवर्तिसम्प्रदायानां विभिन्नानाम् आचार्यानां स्वमतानुरूपेण भाष्याः सन्ति, तदाधारिताः सिद्धान्ताश्च भवन्ति।

**श्रीमद्भगवद्गीता**

प्रस्थानत्रयेषु उपनिषदनन्तरं श्रीमद्भगवद्गीतायाः महत्त्वपूर्णं स्थानं वर्तते। परम्परामनुसारं भगवद्गीता स्मृतित्वेन मन्यते। श्रुत्याधारिताः ग्रन्थाः परम्परामनुसारं स्मृतित्वेन व्यवहर्यते अतः श्रीमद्भगवद्गीता अपि स्मृतिप्रस्थानत्वेन कथ्यते।

प्रस्थानत्रयीषु श्रीमद्भगवद्गीतायाः उपनिषद्ब्रह्मसूत्रे अतिरिच्य पृथक् विशिष्टं महत्त्वं गौरवं च वर्तते। यतश्च वेदान्तदर्शनं यां श्रुतिमाधारितम्वर्तते सा प्रवृत्तिप्रधाना निवृत्ति प्रधाना चोभौ वर्तते। अतः निवृत्तिपरकाणां ब्रह्मसूत्राणाम् उपनिषदां वा प्रमाणत्वेन स्वीकरणे प्रवृत्तिप्रधानतायाः अवहेलनया कश्चिदपि विचारः श्रुतिसम्मतत्वेन प्रतिपादयितुम् अयोग्यो भवति। अनया दृष्ट्या प्रवृत्तिप्रधानस्य श्रीमद्भगवद्गीतायाः प्रस्थानत्रयीषु अद्वितीयं महत्त्वं स्थापितं वर्तते।[3]

प्रस्थानत्रयिषु अस्याः महत्तायाः अन्यमपि महत्त्वपूर्णं कारणं वर्तते- अस्य रमणीया अथवा प्रासादिका शैली वर्तते। उपनिषदां ज्ञानं रहस्यात्मकत्वात् दुर्बोधो जायते। अतः तस्मिन् प्रतिपादितसिद्धान्ता अपि अत्यनताः कठिनाः प्रतीयन्ते। अथ च ब्रह्मसूत्रं सूत्रत्मकत्वाद् अनिश्चितस्वरूपं वर्तते, परन्तु गीतायाः शैली न केवला अत्यनता रमणीया वर्तते, अपितु रोचिका प्रासादिका वर्तते, तथा तस्मिन् प्रतिपादिताः सिद्धान्ता अपि अत्यन्तक्रमबद्धाः सुबोधाश्च सनित। एतमतिरिच्य अस्यां प्रतिपादिताः परमलक्ष्यप्राप्ते मार्गा आदि व्यावाहारिकाः सुगमाश्च सन्ति।

श्रीमद्भगवद्गीतायाः अपरा अन्यविशेषतेदं वर्तते यत् सगुणरूपस्य उपासनायाः पक्षधरागीता वर्तते। इदं च कारणं भवति यत् निर्गुणोपसनया मोक्षप्राप्तिः आरण्यकानां ज्ञानिनां तु संगतं भवति परन्तु गृहस्थजनेभ्यः निर्गुणोपासनं दुर्गमा दुष्करा भवति। गीता स्वयं कथयति-

**क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्।**
**अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते।।**[4]

अतः श्रीमद्भगवद्गीता मोक्षप्राप्तये यस्य मार्गस्य कथनं करोति न केवलेभ्यः ज्ञानिभ्यः अपितु समस्तवर्गाणां मनुष्येभ्यः व्यावहारिका सुगमा च भवति।

अतः श्रीमद्भगवद्गीता न केवलेषु प्रस्थानत्रयिषु अपितु विश्वसाहित्येऽपि विशिष्टप्रस्थानत्रयीषु अपितु विश्वसाहित्येऽपि विशिष्टस्थानं निर्वहति। अस्याः गौरवं महत्ता न केवलेन भारतेन अपितु सम्पूर्णैः विश्वैः स्वीक्रियते, इदमेव कारणम्भवति सर्वाधिकाः ग्रन्थाः श्रीमद्भगवद्गीताधारिताः सन्ति। न केवलैः भारतीयैः विद्वद्भिः प्रशंसा विहिता अपितु पाश्चात्यैः विद्वद्भिरपि मुक्तकण्ठेन प्रशंसा कृता।[5]

**उपसंहारः**

प्रस्थानत्रयी यस्याः अर्थोऽस्ति त्रीणि प्रस्थानि त्रीण् िस्रोतांसि वा इदन्नकेवलं वेदान्तदर्शनस्य विभिन्नशाखाभ्यः आधारभूतं शास्त्रीय-कलेवरमस्ति अपितु भारतीयदार्शनिकपरम्परायामाध्यत्मिकज्ञाना-धिकारस्याद्वितीयस्तम्भरूपे प्रतिष्ठिताऽस्ति। एतानि त्रीणि प्रस्थानानि गीतोपनिषद्ब्रह्मसूत्राणि वेदान्तस्य प्रतिप्रमुखविचार-धारया परमप्रमाणानि मन्यन्ते एषाञ्च समन्वितावबोधेन विना वेदान्तिकचिन्तनस्य गहनतां व्यपकताञ्च आत्मसात्करणमसम्भव-मस्ति। प्रस्थानत्रय्याः अध्ययनं वेदान्तस्य सारभूतसिद्धान्तान् व्याव-हारिकमार्गदर्शनं तार्किकसुसङ्गतिञ्चावबोधनायापरिहार्यमस्ति।

संक्षिप्ततः उपनिषदः श्रुतिप्रस्थानस्य सर्वोच्चमहत्त्वं द्योतयन्ति। इमाः वेदान्तदर्शनस्य प्राथमिकानि अद्वितीयानि च स्रोतांसि वर्तन्ते। श्रुतित्वाद् एताः प्रत्यक्षापौरूपेयज्ञानभण्डारं मन्यन्ते यद् मानवीयतर्कानुभवातीतं सत्यं प्रकटयति। ब्रह्मात्मैक्यं वास्तविक-तायाः परमा प्रकृतिः आध्यात्मिकमुक्तिमार्गसम्बद्धाः मूलभूताः दार्शनिकान्तर्दृष्ट्यः साक्षादुपनिषद्भ्यः प्राप्यन्ते। इमे ग्रन्थाः वेदान्तस्य मूलभूतसिद्धान्तानुद्घाटयन्ति।

श्रीमद्भगवद्गीता स्मृतिप्रस्थानस्य व्यावहारिकं समन्वयात्मकञ्च-महत्त्वमुपस्थापयर्ति इयं वेदान्तिकसिद्धान्तानां व्यावहारिकमनु-प्रयोगाय विभिननदार्शनिकविचाराणां समन्वयाय अद्वितीयमहत्त्वं विदधाति। धर्मकर्मभक्तिज्ञानमार्गाणां सन्तुलितमेकीकृतञ्च दृष्टिकोणं प्रस्तूय वेदान्तिकदर्शनायै एकानिवार्यामार्गदर्शिका जायते।

ब्रह्मसूत्रं वेदान्तिकदर्शनमेकं तार्किकं व्यवस्थितञ्चाधारं प्रददाति यत्तु न्यायप्रस्थानमित्यभिधीयते। महर्षिबादरायणेन रचितानि इमानि सूत्राणि उपनिषद्कथनानि सुसंगतसिद्धान्तेषु सङ्कलयन्ति संभावितविरोधाभासाञ्च तार्किकतया समाधयन्ति। ब्रह्मसूत्रं वेदान्तसिद्धान्तानां बौद्धिकाधारशिलां निर्माति। वेदान्तस्य गूढ-दार्शनिकविचाराणामवबोधनाय तेषाञ्च आलोचनात्मकविश्लेषणाय अस्याः व्यवस्थिता प्रकृतिः अपरिहार्या वर्तते।

**संदर्भ ग्रंथ**


[1]मुक्तिकोपनिषद्, उपनिषत्सङ्ग्रह, 1/30

[2]संस्कृत वाङ्मय का बृहद इतिहास, बलदेव उपाध्याय, दशमखण्ड, वेदान्त, पृ. सं. 462

[3]गीतारहस्य, पहलाप्रकरण, विषयप्रवेश, पृ. सं. 8

[4]श्रीमद्भगवद्गीता 12/5

[5]गीता दिग्दर्शन, डा- सुधाकर तिवारी, भूमिका, पृ. सं. 13